# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-9**

**(Pāṇinian Grammar)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit - I**

**(Marks : 30)**

1. अधोलिखितसूत्रेषु ***द्वयोः*** व्याख्या कार्या। 7×2

   (a) हलन्त्यम्।

   (b) अणुदित् सवर्णस्य चाप्रत्ययः।

   (c) इको गुणवृद्धी।

2. अधोलिखितयोः दीक्षितवचनयोः कस्य***चिदेकस्य*** आशयः स्फुटीकरणीयः। 6×1

   (a) तेन सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

   (b) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

3. अधोलिखितेषु यथेच्छं ***पञ्चानामुत्तरं*** पूर्णवाक्येन **संस्कृतभाषया देवनागरलिप्या** च लेख्यम्। 2×5

   (a) कति माहेश्वरसूत्राणि? तेषाम् अन्त्या इतः भवन्ति न वा?

   (b) अनुनासिक-संज्ञाविधायकं पाणिनिसूत्रं किम्?

   (c) सवर्णस्य लक्षणं किम्?

   (d) पद-संज्ञाविधायकं पाणिनिसूत्रं लिख्यताम्।

   (e) स्वर-व्यञ्जनयोः सावर्ण्यं भवति न वा? विषयेऽस्मिन् पाणिनिसूत्रं किम्?

   (f) सम्प्रसारणविधायकं पाणिनिसूत्रं लेख्यम्।

   (g) अवसान-संज्ञाविधायकं पाणिनिसूत्रं किम्?

**Please Turn Over**

## Unit - II

**(Marks : 25)**

4. अधोलिखितसूत्रेषु कस्य***चिदेकस्य*** व्याख्या कार्या। 7×1

(a) इको यणचि।

(b) स्थानिवदादेशोऽनल्विधौ।

(c) आद्गुणः।

5. अधोलिखितयोः दीक्षितवचनयोः ***एकस्य*** व्याख्या कार्या। 6×1

(a) तन्निमित्तस्यैव इति किम्? ओयते औयत।

(b) पुरस्तादपवादन्यायेनेयं वृद्धिः "एङि पररूपम्" इत्यस्यैव बाधिका, न तु "ओमाङोश्च" इत्यस्य। तेन "अवैहि" इति वृद्धिरसाधुरेव।

6. अधोलिखितेषु ***त्रयाणां*** सूत्रोल्लेखपुरःसरं सन्धिः करणीयः **संस्कृतभाषया देवनागरलिप्या** च। 2×3

(a) गङ्गा + ओघः।

(b) उप + एधते।

(c) प्र + ऋच्छति।

(d) गो + अग्रम्।

(e) दैत्य + अरिः।

7. अधोलिखितेषु ***षण्णां*** **संस्कृतभाषया देवनागरलिप्या** च सन्धिविच्छेदः करणीयः। 1×6

(a) पतञ्जलिः।

(b) गव्यूतिः।

(c) मनीषा।

(d) अक्षौहिणी।

(e) दशार्णः।

(f) गवेन्द्रः।

(g) लघूर्मिः।

(h) मध्वृते।

Unit - III

(Marks : 20)

8. अधोलिखितसूत्रेषु यथेच्छ**मेकस्य** व्याख्या कार्या। 7×1

(a) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

(b) सरूपाणामेकशेष एकविभक्तौ।

(c) यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।

9. अधोलिखितेषु यथेच्छं ***द्वयोः*** पदयोः **संस्कृतभाषया देवनागरलिप्या** च साधनप्रक्रिया प्रदर्श्यताम्। 5×2

(a) रामाय।

(b) रामाभ्याम्।

(c) सर्वे।

(d) सर्वेषाम्।

10. अधोलिखितेषु यथेच्छं ***त्रयाणां*** शब्दरूपं लिख्यताम्। 1×3

(a) राम-शब्दस्य द्वितीयायाः बहुवचनस्य रूपम्।

(b) राम-शब्दस्य षष्ठ्याः बहुवचनस्य रूपम्।

(c) सर्व-शब्दस्य (पुंलिङ्गे) प्रथमायाः एकवचनस्य रूपम्।

(d) सर्व-शब्दस्य (पुंलिङ्गे) तृतीयायाः एकवचनस्य रूपम्।

(e) राम-शब्दस्य सप्तम्याः बहुवचनस्य रूपम्।

———————

# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-10**

**(Indian Philosophy : General Introduction and Special Acquaintance with Nyāya-Vaiśeṣika)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit - I**

**(Marks : 35)**

1. अधोलिखितेषु यथेच्छं कस्य***चिदेकस्य*** उत्तरं प्रदेयम्।

(a) अद्वैतवेदान्तदर्शनमनुसृत्य ब्रह्मस्वरूपम् आलोच्यताम्। 12

(b) नास्तिकास्तिकदर्शनयोः कः भेदः सोदाहरणं व्याख्यायताम्। 12

(c) प्रतीत्यसमुत्पादवादः केन दर्शन-सम्प्रदायेन स्वीकृतः? अस्य मतवादस्य विस्तारिता आलोचना करणीया। 2+10

2. अधोदत्तेषु यथेच्छं ***विषयत्रयम***धिकृत्य टीका लेखनीया। 5×3

(a) सत्कार्यवादः

(b) स्वभाववादः

(c) द्वैतवादः

(d) बहुत्ववादः

(e) हीनयानः

(f) जैनदर्शने त्रिरत्नानि।

3. अतिसंक्षिप्ततया निम्नप्रदत्तेषु प्रश्नेषु ***चतुर्णाम्*** उत्तरं दातव्यम् (सुरगिरा देवनागरलिप्या च)। 2×4

(a) के अनेकान्तवादिनः?

(b) न्यायदर्शने कतिसंख्यकानि प्रमाणानि स्वीकृतानि?

(c) योगदर्शनस्य अपरनामानि कानि सन्ति?

(d) मीमांसादर्शने शब्दः नित्यः अनित्यो वा?

(e) क्षणभङ्गवादः कस्मिन् दर्शने प्रतिष्ठितः?

(f) शाङ्करदर्शनम् एकत्ववादम् अनुसरति द्वैतवादं वा?

(g) भारतीयदर्शने सत्कार्यवादं के स्वीकुर्वन्ति?

(h) के खलु देहात्मवादिनः?

**Unit - II**

**(Marks : 40)**

4. अधोलिखितेषु प्रश्नद्वयस्य उत्तरं प्रदेयम्।

(a) तर्कसंग्रहमनुसृत्य कारणलक्षणमुल्लिख्य तस्य प्रकारभेदाः सोदाहरणं व्याख्येयाः। 3+7

(b) का नाम व्याप्तिः? सा कतिविधा? लक्षणमुल्लिख्य सविस्तरं व्याख्यायताम्। 2+2+6

(c) अभावाः कतिविधाः? तेषां सोदाहरणानि लक्षणानि लिख्यन्ताम्। 3+7

(d) प्रत्यक्षज्ञानं कतिविधम्? इन्द्रियार्थसन्निकर्षस्य भेदाः सोदाहरणं सविस्तरं लिख्यन्ताम्। 3+7

5. अधोदत्तेषु यथेच्छं ***विषयद्वयमधिकृत्य*** टीका लेखनीया। 5×2

(a) अनुमितिः

(b) लक्षणदोषाः

(c) विशेषः

(d) कर्म।

*अथवा*

अधोदत्तेषु ***द्वयस्य*** हेत्वाभासनिरूपणं करणीयम्। 5×2

(a) वह्निरनुष्णो द्रव्यत्वाज्जलवत्।

(b) गगनारविन्दं सुरभि अरविन्दत्वात्सरोजारविन्दवत्।

(c) पर्वतो वह्निमान्प्रमेयत्वादिति।

(d) शब्दो गुणश्चाक्षुषत्वात्।

6. **पञ्चप्रश्नाः** अतिसंक्षेपेण सुरगिरा देवनागरलिप्या च समाधेयाः। 2×5

(a) उपमितेः लक्षणं करणञ्च किम्?

(b) कः आप्तवक्ता?

(c) वाक्यं कतिविधम्?

(d) वैदिकवाक्यं कथं प्रमाणम्?

(e) मनसः लक्षणं किम्?

(f) शक्तेः पदार्थान्तरत्वं कैः स्वीकृतम्?

(g) आसत्तेः स्वरूपं किम्?

(h) किमस्ति विपर्ययस्य लक्षणम्?

# 2025

## SANSKRIT — HONOURS

### Paper : DSCC-11

### (Vedic Literature : Saṃhitās and Brāhmaṇas)

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit - I**

**(Marks : 40)**

1. ऋक्संहितायाः प्रथमसूक्ते कति मन्त्राः सन्ति? तत्र कः ऋषिः, का देवता, किं वा छन्दः? सूक्तगतदेवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 1+1+1+1+6

*अथवा*

"कस्मै देवाय हविषा विधेम"— अत्र कः ऋषिः, का च देवता? "कस्मै" इत्यनेन पदेनात्र कोऽवगन्तव्यः? सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। ½+½+3+6

2. निम्नोद्धृतेषु यथाभिमतम् ***एकतमस्य*** मन्त्रस्य **सुरगिरा देवनागरलिप्या** च व्याख्या कार्या। 6×1

(a) स नः पितेव सूनवे–
ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये॥

(b) मया सो अन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उप क्षियन्ति
श्रुधि श्रुत श्रद्धिवं ते वदामि॥

(c) द्यावा चिदस्मै पृथिवी नमेते
शुष्मांच्चिदस्य पर्वता भयन्ते।
यः सोमपा निचितो वज्रबाहु–
र्यो वज्रहस्तः स जनास इन्द्रः॥

3. अधोदत्तानां विषयाणां मध्ये यथेच्छं ***द्वितयम***वलम्ब्य विनियोगगता संक्षिप्ता टीका विरचनीया। 3×2

स्विष्टकृद्यागः, अभिप्लवषडहः, याज्या, निविद्धानीयम्।

4. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 4×2

(a) अ॒ग्निना॑ र॒यिम॑श्नव॒त्
पोष॑मे॒व दि॒वेदि॑वे।
य॒शसं॑ वी॒रव॑त्तमम्॥

(b) यो जा॒त ए॒व प्र॑थ॒मो मन॑स्वा-
न्दे॒वो दे॒वान् क्रतु॑ना प॒र्यभू॑षत्।
यस्य॒ शुष्मा॒द्रोद॑सी॒ अभ्य॑सेतां
नृ॒म्णस्य॑ म॒ह्ना स जना॑स॒ इन्द्रः॑॥

(c) मि॒त्रं कृ॑णुध्वं॒ खलु॑ मृ॒ळता॑ नो॒
मा नो॑ घो॒रेण॑ चरता॒भि धृ॒ष्णु।
नि वो॒ नु म॒न्युर्वि॑शता॒मरा॑ति-
र॒न्यो ब॑भ्रू॒णां प्रसि॑तौ॒ न्व॑स्तु॥

(d) अ॒हं सोम॑मा॒हनसं॑ बिभ॑र्-
म्य॒हं त्वष्टा॑रमु॒त पू॒षणं॒ भग॑म्।
अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते
सुप्रा॒व्ये॒ ३॒॑ यज॑मानाय सु॒न्व॒ते॥

5. ***एकतर***स्य मन्त्रस्य पदपाठः प्रदर्श्यताम्। 5×1

2(a) अथवा 4(b)।

6. अधोदत्तेषु यथामति ***पञ्चानां*** वैदिकपदानां लौकिकरूपाणि **देवनागरलिप्या** प्रदर्श्यन्ताम्। 1×5

रुद्रेभिः, अश्नवत्, विश्वा, जनासः, कृणोमि, दाधार, सुमेधाम्।

**Unit - II**

**(Marks : 15)**

7. निम्नोद्धृतेषु यथाभिमतं कस्य***चिदेकस्य*** मन्त्रस्य **सुरगिरा देवनागरलिप्या** च व्याख्या कार्या। 7×1

(a) या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी।
तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि॥

(b) असंबाधं मध्यतो मानवानां
यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति
पृथिवी नः प्रथतां राध्यतां नः॥

8. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 4×2

(a) शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्॥

(b) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

(c) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा॥

**Unit - III**

**(Marks : 20)**

9. (a) "ततस्त्वा पारयितास्मीति"— सन्दर्भोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? स कथं कस्य पारयिता बभूव इति भवदीयपाठ्यांशमाधारीकृत्य समुपवर्ण्यताम्। 2+2+6

*अथवा*

(b) शुनःशेपाख्यानं कुत्र समाम्नायते? किं वा अस्य नामान्तरम्? शुनःशेपः कथं केन कति मूल्येन कस्मै विक्रीतः इति आख्यानमिदमाश्रित्य विव्रियताम्। 2+1+4+1+1+1

10. निम्नोद्धृतेषु यथाभिमतं सन्दर्भ ***द्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्॥

(b) स ह निर्दश आस तं होवाच – निर्दशो न्वभूद् यजस्व माऽनेनेति स होवाच, यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य जायन्तामथ त्वा यजा इति तथेति॥

(c) मनवे ह वै प्रातः अवनेग्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽआपेदे॥

———

# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-12**

**(Indian Epigraphy)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit - I

**(Marks : 20)**

1. अधोलिखितयोः ***कस्यचिदेकस्य*** उत्तरं दीयताम्।

   (a) अभिलेखपदस्य कोऽर्थः? प्राचीनभारतेतिहासचर्चायाम् अभिलेखशास्त्राध्ययनस्य प्रयोजनम् आलोच्यताम्। 2+8

   (b) अभिलेखानां प्रकारभेदाः उदाहरणेन सह आलोचनीयाः। 10

2. अधोलिखितेषु यथामति ***पञ्चप्रश्नाः*** समाधेयाः। 2×5

   (a) भारते 'Asiatic Society' नाम प्रतिष्ठानं केन कदा च प्रतिष्ठितम्?

   (b) आङ्गलशासनकाले माद्राजसर्वकारस्य प्रथमोऽभिलेखविद् कः आसीत्? तस्य प्रसिद्धग्रन्थस्य नामोल्लेखं कुरु।

   (c) द्वितीयपुलकेशिनः आइहोल-प्रशस्त्यां कस्य कविद्वयस्य उल्लेखो वर्तते?

   (d) केन विदुषा प्रथमतः आदिब्राह्मीलिपेः पाठोद्धारे साफल्यं प्राप्तम्? तस्य सहकारिषु एकस्य नामोल्लेखः कार्यः।

   (e) 'Indian Palaeography' इति ग्रन्थस्य रचयिता कः? तस्य पितृभूमेः नामोल्लेखं कुरु।

   (f) प्रशस्तिमूलकयोः द्वयोरभिलेखयोरुल्लेखः कार्यः। तयोः प्रणेतारौ च उल्लिख्येताम्।

   (g) 'Archaeological Survey of India' इति प्रतिष्ठानं कदा प्रतिष्ठितम्? क आसीत् तस्य प्रथमः सर्वाधिकारी?

### Unit - II

**(Marks : 35)**

3. निम्नलिखितयोः ***एकतरस्य*** उत्तरं प्रदीयताम्।

   (a) प्रथमरुद्रदाम्नो जुनागडलेखानुसारं सुदर्शनतडागस्य सेतुः कदा कथं च भग्नो जातः? अत्र सुदर्शनसेतोः कीदृशम् इतिवृत्तमुपलभ्यते? तस्य संस्कारार्थं रुद्रदाम्ना कीदृशः उद्योगः कृतः? 1+3+2+4

**Please Turn Over**

(b) प्रयागस्तम्भलेखे कस्य प्रशस्तिः कृता? केन वा प्रशस्तिरियं रचिता? तदभिलेखम् अनुसृत्य दाक्षिणात्यस्य राज्यानां भौगोलिकावस्थानम् आलोच्यताम्। 1+1+8

4. अधोलिखितेषु विषयेषु यथामति ***टीकात्रयं*** लेख्यम्। 5×3

(a) समाजः

(b) अनुपोसथं

(c) सुविशाखः

(d) उपरिकः

(e) कुमारगुप्तः

5. अधोलिखितेषु यथामति ***पञ्चप्रश्नाः*** समाधेयाः। 2×5

(a) रुद्रदाम्नः जुनागड् इत्यभिलेखस्य प्रचारकालः उल्लेखनीयः। तस्य पितामहस्य नामोल्लेखं कुरु।

(b) कस्मिन् राज्यवर्षे खारवेलेन ऋषिकनगरम् अधिकृतम्? कस्मिन् नदीतीरे सा नगरी अधिष्ठिता?

(c) 'भ्रष्टराजप्रतिष्टापकेन' इत्यस्य कोऽर्थः?

(d) तिलभट्टः कः? कस्मिन् लेखे तस्य नामोल्लेखः दृष्टः?

(e) प्रथमरुद्रदाम्नः पितुः पितामहस्य च नामोल्लेखः कार्यः।

(f) "__________ गिरौ भगवतो __________ स्थापितः"– इत्यत्र शून्यस्थानं पूरणीयम्।

(g) "लिच्छविदौहित्रस्य __________ __________ उत्पन्नस्य"– इत्यत्र शून्यस्थानं पूरणीयम्।

## Unit - III

**(Marks : 20)**

6. अधोलिखितेषु यथामति ***विषयद्वयस्य*** टीका कार्या। 5×2

(a) विक्रमाब्दः

(b) गुप्ताब्दः

(c) शकाब्दः

(d) अमात्यः।

7. अधोलिखितेषु ***द्वयोः*** सङ्केतयोः गाणितिकसंख्याभिः परिवर्तनं कृत्वा उल्लिखिताब्दानुसारं खिष्टाब्दे परिणमयत। 5×2

(a) अचलारातिषडिन्दुपरिमिते शकाङ्कवर्षे।

(b) तुरगाश्ववेदाङ्कक्षमातमे विक्रमाब्दे।

(c) ब्रह्मरसार्णववसुधरावर्षे शाके।

(d) मालवानां गणस्थित्या शतचतुष्टये त्रिनवत्यधिकेऽब्दानाम्।

---